॥नमः शिवाय॥ निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् बालानां सुखबोधाय क्रियते तर्कसंग्रहः १
द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव रूपरस
गन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विं
शतिर्गुणाः उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंच कर्माणि परमपरं चेति द्विविधं सामान्यं नित्यद्रव्यवृत्तयो विशेषा
स्त्वनंता एव समवायस्त्वेक एव अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावः अत्यंताभावः अन्योन्याभावश्चेति गन्धवती पृथ्वी सा द्विधा
नित्यानित्या चेति नित्या परमाणुरूपा अनित्या कार्य्यरूपा पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीरमस्मदादीनां इंद्रियं
गंधग्राहकं घ्राणं नासाग्रवर्त्ति विषयो मृत्पाषाणादि शीतस्पर्शवत्य आपः ता द्विविधा नित्या अनित्याश्च नित्याः परमाणुरूपाः अ
नित्याः कार्य्यरूपाः पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीरं वरुणलोके इंद्रियं रसग्राहकं रसनं जिह्वाग्रवर्त्ति वि
षयः सरित्समुद्रादि उष्णस्पर्शवत्तेजः तद्द्विविधं नित्यमनित्यं च नित्यं परमाणुरूपं अनित्यं कार्य्यरूपं पुनः
त्रिविधं शरीरेंद्रियविषयभेदात् शरीरमादित्यलोके इंद्रियं रूपग्राहकं चक्षुः ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चक्षुः कृष्णताराग्रवर्त्ति सर्वमर्त्यद्रव्यजनक विषयस्तु चतुर्विधः भौमदिव्योदर्याकरजभेदात् भौमं वह्न्या
दिकं अबिंधनं दिव्यं विद्युदादि भुक्तपरिणामहेतुरौदर्यं आकरजं सुवर्णादि रूपरहितस्पर्शवान् वायुः
स द्विविधः नित्योऽनित्यश्च नित्यः परमाणुरूपः नित्यः कार्यरूपः पुनस्त्रिविधः शरीरेंद्रियविष
यभेदात् शरीरं वायुलोके इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्त्ति विषयो वृक्षादिकंप हेतुः शरीरां
तःसंचारी वायुः प्राणः स चैकोप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते शब्दगुणमाकाशं तच्चैकं विभु नित्यं
च अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च प्राच्यादिव्यवहारहेतुर्दिक् सा चैका नित्या विभ्वी च ज्ञा
नाधिकरणमात्मा स द्विविधः जीवात्मा परमात्मा तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवः प्रतिशरीरं भिन्नो
विभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिंद्रियं मनः तच्च प्रत्यात्मनियतत्वादनंतं परमाणुरूपं नित्यं च चक्षु
र्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधं पृथिवीजलतेजोवृत्ति तत्र पृ
थिव्यां सप्तविधं अभास्वरशुक्लं जले शुक्लं भास्वरं तेजसि रसनाग्राह्यो गुणो रसः स च मधुराम्ललवण
कटुकषायतिक्तभेदात् षड्विधः पृथिवीजलवृत्तिः पृथिव्यां षड्विधः जले मधुर एव घ्राणग्राह्यो गुणो गंधः स

प्राणापानसमानोदानव्यानपंचक इत्यमर निश्चितत्वात्

नित्यज्ञानाधिकरणत्वमीश्वरत्वं ननु ईश्वरस्य सद्भावे किं प्रमाण
नत्वप्रत्यक्षं न धियाः ... नाद्यः अरूपद्रव्यत्वात् ना
पीवात्मसुखादिव्यतिरिक्तत्वात् नाप्यनुमानं लिंगाभावादिति चेन्न
अंकुरादिकं सकर्तृजन्यं कार्यत्वात् घटादिवदित्यनुमानस्य प्रमा
णत्वात् उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृ
त्वं सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वं सुखादिकं जीवत्वं
जीवेशयोः ... मनसोल ...

च

चद्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः सत्रिविधः शीतो
ष्णानुष्णाशी तभेदात् सर्वत्रसंख्यानित्य पृथिव्यप्तेजोवायुवृत्तिः तत्र शीतोजले उष्णस्तेजसि अनुष्णाशी
तः पृथिवीवाय्वोः रूपादिचतुष्टयं पृथिव्यांपाकजमनित्यंच अन्यत्रापाकजं नित्यमनित्यंच नित्य
गतं नित्यं अनित्यगतमनित्यं एकादिव्यवहारहेतुः संख्या नवद्रव्यवृत्तिः एकत्वादिपरार्द्धपर्य्यंता
एकत्वं नित्यगतं नित्यं अनित्यगतमनित्यं द्वित्वादिकंतु सर्वत्रानित्यमेव मानव्यवहारसाधारणं कार
णंपरिमाणं नवद्रव्यवृत्ति तच्चतुर्विधं अणुमहद्दीर्घह्रस्वं चेति पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् सर्वद्रव्यवृत्तिः
संयुक्तव्यवहारहेतुः संयोगः नवद्रव्यवृत्तिः संयोगनाशको गुणो विभागः नवद्रव्यवृत्तिः परापरव्यवहा
रकारणे परत्वापरत्वे पृथिव्यादिचतुष्टयमनोवृत्तिनी ते द्विविधे दिक्कृते कालकृते चेति दूरस्थे दिक्कृतं साधारण
परत्वम् समीपस्थे दिक्कृतमपरत्वम् ज्येष्ठे कालकृतं परत्वम् कनिष्ठे कालकृतमपरत्वम् आद्यपत
नासमवायिकारणं गुरुत्वम् पृथिवीजलवृत्ति स्यंदनासमवायिकारणं द्रवत्वम् पृथिव्यप्तेजोवृत्तिः २

आद्य

तद्द्विविधं सांसिद्धिकं नैमित्तिकं चेति सांसिद्धिकं जले नैमित्तिकं पृथिवीतेजसोः पृथिव्यां घृतादौ अग्नि
संयोगजं द्रवत्वम् तेजसि सुवर्णादौ चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः
शब्दः आकाशमात्रवृत्तिः स द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ वर्णात्मकः
संस्कृतभाषादिरूपः सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं सा द्विविधा स्मृतिरनुभवश्च संस्कारजन्यं ज्ञानं स्मृतिः त
द्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थोऽयथार्थश्च तद्वति तत्प्रकारकोऽनुभवो यथार्थः सैव प्रमेत्युच्यते तदभाव
वति तत्प्रकारकोऽनुभवोऽयथार्थः यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्द भेदात् तत्कर
णमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् असाधारणं कारणं करणं कार्यनियतपूर्ववृत्ति
कारणं कार्यं प्रागभावप्रतियोगि कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् यत्समवेतं कार्यमुत्पद्यते तत्
समवायिकारणं यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः कार्येण कारणेन वा सहैकस्मिन्नर्थे समवे
तत्वे सति कारणमसमवायिकारणं यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य तदुभयभिन्नं कारणं
निमित्तकारणं यथा तुरीवेमादिकं पटस्य तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणं

अनन्यथासिद्ध

घटत्ववति भूत
ले घटत्ववतिप्र
टघटत्वप्रकारक
यत्ज्ञानं यथा
र्थ

यथाघटघटत्वे निर्विकल्पकं

३ तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षं इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधं सविकल्पकं
निर्विकल्पकं चेति तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकं सप्रकारकं ज्ञानं सविकल्पकं यथा डित्थोयं ब्राह्मणोयं
श्यामोयमिति प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः संयोगः
संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवाय विशेषणविशेष्यभावश्चेति चक्षु
षा घटप्रत्यक्षजनने संयोग सन्निकर्षः घटरूपप्रत्यक्षे संयुक्तसम वायः चक्षुःसंयुक्ते घटे रू
स्य म स्यसमवायात् रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः चक्षुसंयुक्ते घटे रूपं समवेतं तत्र रूपत्व घट
म स्यसमवायात् श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रो
त्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् शब्दत्वसाक्षात्कारे समवेतसमवायः
समवायसंबंधकरके
संनिकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् अभावप्रत्यक्षे विशेषणविशेष्यभावसन्निकर्षः घ
टाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं
तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धं अनुमितिकर

परामर्शः

अनुमानं परामर्शजन्यं ज्ञानमनुमितिः व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः यथाव-
ह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं × तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः यत्र धूमस्त-
त्राग्निरिति साहचर्यनियमो व्याप्तिः व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता अनुमानं द्वि-
विधं स्वार्थं परार्थं चेति स्वार्थं स्वानुमितिहेतुः तथाहि स्वयमेव भूयो दर्शनेन यत्र धूमस्त-
त्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ संदिहानः पर्वते धूमं प-
श्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति [illegible] तदेव स्वार्थानुमानं यत्तु स्वयं धू-
मादग्निमनुमाय परं प्रति प्रत्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानं यथा पर्वतो व-
ह्निमान् धूमवत्त्वात् यो यो धूमवान् स सोऽग्निमान् [illegible] महानसमित्युदाहरणम् तथा चा-
यमित्युपनयः तस्मात्तथेति निगमनं स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणं त-
स्माल्लिङ्गपरामर्शोऽनुमानं लिङ्गं त्रिविधं अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चे-

अनुमिति

६४ तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते अयमेव लिङ्गपरामर्श इत्युच्यते तस्मात्पर्वतो वह्निमानिति ज्ञानमुत्पद्यते ६४
२६ यथा महानसं तथा चायम् तस्मात्तथेति अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पं- २
चावयवाः पर्वतो वह्निमानिति प्रतिज्ञा धूमवत्त्वादिति हेतुः यो यो धूमवान् स सोऽग्निमान् यथा महानसम्
इत्युदाहरणं

ति॥ अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि॥ यथा वह्नौ साध्ये धूमवत्वं सन्निअन्वय
व्यतिरेकी॥ यत्र धूमस्तत्राग्निरिति अन्वयव्याप्तिः यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति व्यतिर
क॥ यथा महाह्रद इति व्यतिरेकव्याप्तिः अन्वयमात्रव्याप्तिकं केवलान्वयि॥ यथा घटोऽभिधेयः प्र
मेयत्वात् पटवदिति॥ अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वात्
अभिधेयत्वाच्च॥ व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि॥ यथा पृथिवी इतरेभ्यो भिद्यते गन्धव
त्वात् यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलं न चेयं तथा तस्मान्न तथेति अत्र यद्गन्धवत्
भ्यो तदितरेभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् संदिग्धसाध्यवान् पक्षः॥ य
था धूमवत्वे हेतौ पर्वतः॥ निश्चितसाध्यवान् सपक्षः॥ यथा तत्रैव महानसः॥ निश्चितसाध्याभा
ववान् विपक्षः॥ यथा तत्रैव ह्रदः॥ सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः॥

वृनु

सव्यभिचारो नैकान्तिकः सत्रिविधः साधारणासाधारणानुपसंहारिभेदात् तत्रसाध्याभाववद्वृत्तिः

नैकान्तिकः२ साधारणो यथा पर्वतोवह्निमान् प्रमेयत्वात् प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् स

र्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः यथा शब्दोनित्यः शब्दत्वात् इति शब्दत्व

मात्र१ सर्वेभ्योनित्येभ्योअनित्येभ्यश्चव्यावृत्तंशब्दवृत्तिः अन्वयव्यतिरेकदृष्टान्तरहितोनुपसंहारी

यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यापिपक्षत्वात् दृष्टान्तो नास्ति साध्याभावव्याप्योहेतुर्वि

रुद्धो यथा शब्दोनित्यः कृतकत्वादिति कृतकत्वंहि नित्यत्वाभावेना नित्यत्वेनव्याप्तं यस्य

साध्याभावसाधकं हेत्वन्तरंविद्यते सः सत्प्रतिपक्षः यथा शब्दोनित्यः श्रावणत्वात् शब्दत्व

वत् शब्दोअनित्यः कार्यत्वात् घटवत् असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धोव्या

प्यत्वासिद्धश्चेति आश्रयासिद्धो यथा गगनारविन्दंसुरभि अरविन्दत्वात् सरोजारवि

व्याप्यत्वासिद्धो द्विविधः व्याप्तिग्राहकप्रमाणाभावात् सोपाधिकत्वाच्च ॥ आद्यो यथा शब्दः क्षणिकः सत्त्वात् अत्र सत्त्वक्षणिकयोर्व्याप्ति
ग्राहकं प्रमाणं नास्ति २ त्रुटि २

गेहे:

सत्प्र २ पञ्चहेत्वाभावः २१

न्वर्तते अत्र गगनारविन्दमाश्रयः स च नास्त्येव स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वादिति
५ हेतु अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् सोपाधिको व्याप्यत्वासिद्धः साध्यव्यापकत्वे
लक्षणम्: सति साधनाव्यापक उपाधिः साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वं सा
धनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं पर्वतो धूमवान् वह्निमत्वादित्यत्र आ
र्द्रेन्धनसंयोग उपाधिः यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता यत्र वह्निस्तत्रार्द्रेन्धन
संयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावात् एवं साध्यव्यापकत्वे सति साधनाव्या इति साधनाव्यापकत्वं २८
पकत्वात् आर्द्रेन्धनसंयोग उपाधिः सोपाधिकत्वात् वह्निमत्वं व्याप्यत्वासिद्धं यस्य साध्या
भावः प्रमाणान्तरेण निश्चितः स बाधितः यथा वह्निरनुष्णो द्रव्यत्वादिति अत्रानुष्णत्वं साध्यं
तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वं व्याख्यातमनुमानम् उपमिति
करणमुपमानं संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः तत्करणं सादृश्यज्ञानम् तथा हि कश्चिन्ना

गोसादृश्यविशिष्टपिंडं पश्यति   यथा गामानयेति २३   इति व्याख्यातमुपमानम् २२

गवयशब्दार्थमजानन् कुतश्चित् आरण्यकात्पुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्या
र्थं स्मरन् गोसदृशं पश्यति तदनंतरं अयं गवयशब्दवाच्य इत्युपमितिरुत्पद्यते आप्तवाक्यं
शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः शक्तं पदं अस्मात्पदादयमर्थो बोद्धव्यः इति
ईश्वरसंकेतः शक्तिः आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः पदस्य पदान्तरव्यतिरे
कप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता पदानामविलम्बेनोच्चारणं सन्नि
धिः आकांक्षादिरहितं वाक्यं अप्रमाणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणं आकां
क्षाविरहात् अग्निना सिंचेदिति न प्रमाणं योग्यताविरहात् प्रहरे प्रहरे असहोच्चारिता स
नि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् वाक्यं द्विविधं वैदिकं लौकिकं च वैदिक
मीश्वरोक्तत्वात्सर्वमेव प्रमाणं लौकिकं त्वाप्तोक्तं प्रमाणं अन्यदप्रमाणं वाक्यार्थज्ञा
नं शाब्दज्ञानं तत्करणं शब्दः यथार्थानुभवो निरूपितः अयथार्थानुभवस्त्रिविधः संशय २

मेद २

श्री
तर्कःसं
६

शयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः
यथा स्थाणुर्वा पुरुषो वेति मिथ्याज्ञानं विपर्ययः यथा शुक्ता विदं रजतमिति व्याप्या
रोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यादिति स्मृतिरपि यथा
र्थायथार्था चेति प्रमाजन्या यथार्था अप्रमाजन्या यथार्था सर्वेषामनुकूलवेदनीयं सुखं
सर्वेषां प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः विहितकर्मजन्यो
धर्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोष्टावात्ममात्रविशेषगुणाः बुद्धीच्छाप्र
यत्ना नित्या अनित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः वेगो भावना स्थि
तिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः अनुभवजन्या स्मृतिहेतुर्भावना साचा
त्ममात्रवृत्तिः अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिवीमा
त्रवृत्तिः चलनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहेतुरपक्षेप

क्षेप

इति गुणाः ९

रजतमुत्त
स्मृतिः द्विधा

राम
६

नं॰

१ शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम् विप्रकृष्टसंयोगहेतुः प्रसारणम् अ
न्यत्सर्वं गमनं नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुणकर्मवृत्तिः परमपरं च द्रव्य

द्वैकाः विशेषाः — त्वादि नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः नित्यसम्बन्धः समवायः अयुतसिद्धवृत्तिः ययोर्मध्ये एकमविनश्यदपरा

यथा २४ — श्रितमेवावतिष्ठते तावयुतसिद्धौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियाव
न्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति अनादिः सान्तः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य
सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य त्रैकालिकः संसर्गावच्छिन्नप्रतियोगिता
कोऽत्यन्ताभावः यथा भूतले घटो नास्तीति तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिता

भावो — कोऽन्योन्याभावः घटः पटो न भवति इति सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावा
त्सप्तैव पदार्था इति सिद्धम् इति श्रीअन्नंभट्टविरचितस्तर्कसंग्रहः समाप्तः शुभम्

वं॰

वृ: ३३ काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः १

यथा

श्री
तर्कः सं
१

इयमात्मापरानन्दः परप्रेमास्पदं यतः मानभूवं हि भूयासमिति प्रेमात्मनिस्थिते: ॥१॥ ८८ ८८ ८८
इयं संवित्स्वात्माभवति यतः परानन्दः नामनित्यानन्दरूपत्वात् परप्रेमास्पदं उत्कृष्ट
प्रेमास्पदं हि यस्मात् आत्मानि विषये ऽहं माभूवं इति न मम आसत्वं कदापि
न किंतु भूयासं एव सदा सत्त्वमेव मम भूयात् इत्येवंविधप्रेम इष्यते सर्वैरनुभूयते॥२॥
मुहूर्तनाम विनिर्मितं रसफलैः पात्रं घटाद्वीकृतं मूलाद्दृढ षडंगुलं सुघटितं विस्तारतस्याष्टकम् विद्धं
स्वर्णसलाकया त्वविवरं माषैकया याघरी इत्यं चेत्पल षष्टीवारपठनाद्वेत्पूर्तिनं स्लोककेः ॥२॥
ॐ श्रीगणेशाय नमः ॐ गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसारभक्षकं उमासु
तं शोकविनाशकारणम् नमामि विघ्नेश्वरपादपंकजम्॥

१

ॐश्रीगुरुगणपतिभ्यांनमः ॐश्रीगणेशंनमस्कृत्यपार्वतीशंकरौपरौ मयाचंद्रजसिंहेनक्रियतेपदकृत्यकं
१ यस्मादिदमिदंमन्येबालानामुपकारकं तस्माद्धितकरंवाक्यंवक्तव्यंबुद्धिःसदा २ विश्वेशंजगत्क
र्तारंश्रीसांबमूर्तिंनिधायनितरांधारयित्वा गुरुवंदनंविधायेत्यर्थः बालेति अत्राधीतव्याकरणको
शोऽनधीतन्यायशास्त्रोबालः व्यासादावतिव्याप्तिवारणायानधीतन्यायेति सुखेनेतिप्रमाकेति
वारणायाधीतव्याकरेति सुखेति सुखेनानायासेनबोधायपदार्थतत्त्वज्ञानायेत्यर्थः तर्क्यंतेप्रमि
तिविषयीक्रियंतेइतितर्काद्रव्यादिपदार्थास्तेषांसंग्रहःसंक्षेपेणोद्देशलक्षणपरीक्षायस्मिन्सग्रंथः
नाममात्रेणवस्तुसंकीर्तनमुद्देशः यथाद्रव्यंगुणइति असाधारणधर्मोलक्षणं यथागंधवतीपृथिवी
लक्षितस्यलक्षणंसंभवतिनवेतिविचारःपरीक्षा अत्रोद्देशस्यपक्षज्ञानंफलं लक्षणस्येतरभेदज्ञानं
फलं परीक्षायाःलक्षणदोषपरिहारेतिमंतव्यं तत्रेति तत्रसप्तपदार्थमध्येइत्यर्थः द्रव्याणिन
वैवेत्यन्वयः एवंतत्रेतिपदंचतुर्विंशतिगुणाइत्यादिनाप्यन्वयेति द्रव्यत्वजातिमत्त्वंगुणवत्त्वंसम
वायिकारणत्वंवाद्रव्यसामान्यलक्षणं रूपेति कर्माणीति परमपरंचेति परसामान्यमपरसा

मान्यमित्यर्थः परत्वं चाधिकदेशवृत्तित्वं अपरत्वं न्यूनदेशवृत्तित्वं तदेवादिलक्षणे यदव्याप्त्यतिव्याप्त्यसंभ
वरूपदोषत्रयशून्यं यथा गोः सास्नादिमत्त्वं अव्याप्तिरलक्ष्यैकदेशावृत्तित्वं अत एव गोर्नकपिलत्वं लक्षणं
तस्याव्याप्तिग्रस्तत्वात् अतिव्याप्तिरलक्ष्यवृत्तित्वं लक्ष्यालक्ष्यवृत्तित्वं अत एव गोः शृंगित्वं लक्षणं त
स्यातिव्याप्तिग्रस्तत्वात् असंभवस्तु लक्ष्यमात्रावृत्तित्वं यथा गोरेकशफत्वं न लक्षणं तस्यासंभवग्रस्त
त्वात् नित्येति ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वं ध्वंसेत्यतिव्याप्तिनिवारणाय ध्वंसभिन्नत्वे
ति घटादावतिव्याप्तिनिवारणाय विशेष्यदलं ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं वा अनित्यत्वं
अंत्यावयवित्वे सति उपभोगायतनं शरीरं चेष्टाश्रयो वा इंद्रियमिति चक्षुरादावतिव्याप्तिनिवारणाय
गंधग्राहकमिति कालादावतिप्रसक्तिनिवारणाय इंद्रियमिति विषयेति शरीरेंद्रियभिन्नत्वे
सति उपभोगसाधनं विषयः शरीरादावतिव्याप्तिनिवारणाय सत्यंतं परमाण्वादावतिव्याप्तिनिवार
णाय विशेष्यदलं कालादावतिव्याप्तिनिवारणाय जन्यत्वे सतीत्यपि बोध्यं शीतेति तेजआदा
वतिव्याप्तिनिवारणाय शीतेति आकाशनिवारणाय स्पर्श इति कालादावतिप्रसक्तिनिवारणाय समवा
यसंबंधेनेति पदं देयं इंद्रियमिति त्वगादावतिव्याप्तिनिवारणाय रसग्राहकमिति रसनेंद्रि

ब·प
२

परसमान्निर्षादावतिव्याप्तिनिरासः इन्द्रियमिति सौरादिति आदिना नरागहिमकर्कोटीनां संग्रहः उष्णेति ज
लादावतिव्याप्तिनिरासाय उष्णेति कालादावतिव्याप्तिनिवारणाय समवायसंबंधेनेत्यपि देयं इन्द्रियमिति
शाब्दि· घ्राणादावतिवारणाय रूपग्राहकमिति कालादावतिव्याप्तिवारणाय इन्द्रियमिति भेदादिति प्रत्येकमभि
संबध्यते भौममिति आदिना खद्योतगततेजःप्रभृतेः परिग्रहः विद्युत्तेति आदिनार्कचंद्रादीनां परिग्र
हः भुक्तेति भक्षस्यान्नादेः पीतजलस्य परिणामो जठरानलस्तस्य हेतुरौदर्यमित्यर्थः सुवर्णेति आदिना
रजतादेः परिग्रहः स्पर्शेति घटादिवारणाय विशेष्यं आकाशादिवारणाय विशेषणं इन्द्रियेति च इन्द्रियेति च
तूलादिवारणाय स्पर्शग्राहकमिति कालादिवारणाय विशेषणं मनआदिवारणाय विशेष्यं धनेन देति आदिपदे
यवारणाय संचारीति उच्छ्वसितेति मुखनासिकाभ्यां निर्गमनप्रवेशनात्प्राणः जलादेरधोनयनादपानः न जलादीनां परि
भुक्तपरिणामायजाठरानलस्य समुन्नयनात्समानः अन्नादेरूर्ध्वनयनादुदानः नाडिमुखेषु वितननाद्व्या ग्रहः संचारी
नः इति क्रियाभेदोपाधिभेदात्तत्तत्संज्ञाव्यवह्रियत इत्यर्थः शब्देति शब्दो गुणो यस्य तत्तथा असंभववारणाय ति महावायुवा
एकगुणाय विभ्विति सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं अतीतेति अतीत इत्यादिव्यवहारः रणाय
अतीतभविष्यद्वर्तमानरूपात्मकलक्षणाधारणे तु काल इत्यर्थः नन्विदं लक्षणमाकाशेतिव्या

राम
२

ते व्यवहारस्य शब्दात्मकत्वादिति चेन्न अत्र हेतुपदेन निमित्तहेतोर्विवक्षितत्वात् नचैवमपि कंठताल्वा
द्यभिघातेतिव्याप्तिरितिवाच्यं विभुत्वस्यापि निवेशनात् प्राचीति इयं प्राचीयमवाचीयं प्रतीचीयमु
दीचीत्यादिव्यवहारासाधारणकारणं दिगित्यर्थः हेतुर्दिगित्युच्यमाने परमाण्वादावतिव्या
प्तिः स्यात् तद्वारणाय व्यवहारहेतुरिति कालादिवारणायासाधारणेति ज्ञानाधिकरणेति
भूतलादिवारणाय ज्ञानेति कालादिवारणाय समवायेनेत्यपि देयं ईश्वरेति समवायसंबंधेन नि
त्यज्ञानवानीश्वरः जीवेति सुखादिसमवायिकारणं जीवः सुखेति आत्ममनःसंयोगादिवार
णाय इंद्रियमिति चक्षुरादिवारणाय सुखेति अथ गुणाः चक्षुरिति रूपत्वादिवारणाय गुणपदं
रसादिवारणाय चक्षुर्ग्राह्येति संख्यादिवारणाय मात्रपदं यद्यपि प्रभाभित्तिसंयोगवारणाय गुणा
पदेन विशेषगुणस्य विवक्षणीयतया तत एव संख्यादिवारणे संभवति मात्रपदं व्यर्थं तथापि सां
सिद्धिकद्रवत्ववारणाय तदावश्यकं वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्य
जातिमत्त्वस्य विवक्षणीयतया विशेषपदं न देयं आकाशादिवारणाय गुणपदे तद्देयं सत्तेति रूपमि

त्यनुषज्यते रसनेति रसत्वादिवारणायगुणइति रूपादावतिव्याप्तिवारणायरसनेति तत्रपृथ्वीति पृ
थिवीजलयोरित्यर्थः षड्विधेति इत्यत्ररसइत्यनुवर्त्तते घ्राणेति गंधत्वादावतिव्याप्तिवारणायगुणेति
रूपादावतिव्याप्तिवारणायघ्राणग्राह्येति पृथिवीति गंधप्रतीतिसत्त्वेपृथिवीसंबंधसत्त्वे पृथिवीसंबंध
भावेगंधप्रतीत्यभावइत्यन्वयव्यतिरेकाभ्यांपृथिवीगंधस्यैवजलेप्रतीतिर्बोध्या पूर्वछायायामपि ननुदे
शांतरस्थकल्हारीकुसुमसंबंधएवनस्रोतदेशेतत्संबंधाभावाद्गंधप्रतीत्य नुपपत्तिः नचवाय्वानीत
त्रसरेणुकादिसंबंधोऽस्त्येवेतिवाच्यं कल्हार्यांन्यूनतापत्तेःकुसुमस्यचसच्छिद्रतापत्तेरितिचेन्न मोक्षकरस
विशेषेणरूपवत्व्याप्यकोटेरनुत्पत्तिः कर्पूरादौतु तदभावान्नतथात्वं त्वगिति स्पर्शत्वादावति
व्याप्तिवारणायगुणइति रूपादावतिव्याप्तिवारणायत्वगिंद्रियेति संख्यादिवारणायमात्रपदं त
ज्ञेति पृथिव्यादिचतुष्टये शीतेति शीतस्पर्शः उष्णेति उष्णस्पर्शः एकादेरिति एकत्वमित्यादि
र्योव्यवहारः एकद्वित्वादिकस्तस्यहेतुःसंख्येत्यर्थः घटादिवारणायएकादेरिति कालादिवा
रणायासाधारणेत्यपिदेयं ननुसंख्याया[illegible]गुणत्वमस्तिनवेत्यत आह एकत्वादिति तथाच एकदेश

शतं चैव सहस्रमयुतं तथा लक्षं च नियुतं चैव कोटिरर्बुदमेव च १ वृंदं खर्वो निखर्वश्च शंखः पद्मश्च सागरः अं
त्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमं २ इति महद्गुणे परार्द्धपर्यन्ते वेति भावः मानेति मानं परिमितिस्तस्या व्य
वहार इदं महदिदमणु इत्याद्यात्मकस्तस्य कारणं परिमाणमित्यर्थः दंडादिवारणाय मानेति कालादिवार
णाय असाधारणेति प्रत्यक्षकारणाय कारणेति नवद्रव्येति चतुर्विधमपि परममध्यमभेदेन द्विविधं तत्र प
रमाणुत्वं ह्रस्वत्वं च परमाणुमनसोः मध्यमाणुत्वह्रस्वत्वे द्व्यणुके परममहत्त्वदीर्घत्वे गगनादौ मध्यमम
हत्त्वदीर्घत्वे घटादौ एतन्मौक्तिकादिदं मौक्तिकमणुरिति व्यवहारस्य पाक्षिकत्वं महत्त्वाज्ञानत्वेनाध्यं एवं
केतनात् व्यजनं ह्रस्वमित्यत्रापि निकृष्टदीर्घत्वाज्ञानत्वं पृथगिति अयमस्मात्पृथगिति व्यव॰ इ
रस्य कारणं पृथक्त्वमित्यर्थः दंडादिवारणाय पृथगिति कालादिवारणाय साधारणेति पृ[illegible]
हारत्ववारणाय कारणेति संयुक्तेति इमौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः संयोग इत्यर्थः दंडादि
वारणाय संयुक्तव्यवहारेति कालादिवारणाय साधारणेत्यपि इदं संयुक्तव्यवहारत्वेति प्रसक्तिवारणा
य हेत्वन्तरेति उपदर्शितलक्षणं चतुष्टये असाधारणमिदं कचित्पुस्तके परिमाणादिपञ्चकलक्षणं

असाधारणपदं दृश्यते तन्नाधुनिकैर्न्यस्तमिति बोध्यम् । संयोगेति संयोगनाशजनकमित्यर्थः कालेति व्याप्ति
वारणाय गुणपदं ईश्वरेच्छादिवारणायासाधारणेत्यपि बोध्यं ननु असाधारणपदादेव गुणपदस्य वैयर्थ्यमा
पतितिचेन्न क्रियायामतिप्रसक्तिवारणाय तस्यावश्यकत्वात् परेति परव्यवहारासाधारणं कारणं पर
त्वं अपरव्यवहारासाधारणं कारणमपरत्वमित्यर्थः दंडादिवारणाय परव्यवहारेति कालादिवारणाया
साधारणेति परव्यवहारत्ववारणाय कारणेति एवमेव द्वितीयेपि बोध्यं आद्येति दंडादिवारणाय सम
वायीति रूपादिवारणाय पतनेति वेगातिव्याप्तिवारणायाद्येति स्पंदनेति दंडादिवारणाय असमवा
यीति रसादिवारणाय स्पंदनेति चूर्णादीति चूर्णं पिष्टं तदादिर्यस्य मृत्तिकादेः स चूर्णादिस्तस्य पिंडी
भावः संयोगविशेषस्तस्य हेतुः निमित्तकारणं स्नेह इत्यर्थः कालादिवारणाय गुणपदं रूपादावतिव्या
प्तिवारणाय पिंडीभावेति चूर्णपदं स्पष्टार्थं श्रोत्रेति शब्दत्वेऽतिव्याप्तिवारणाय गुण इति रूपादिवा
रणाय श्रोत्रग्राह्येति वस्तुतस्तु श्रोत्रोत्पन्नशब्दस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्नेऽव्याप्तिवारणाय श्रो
त्रग्राह्यजातिमत्वे तात्पर्यात् गुणपदमनुपादेयमेव सर्वेति सर्वेषां व्यवहारा आहारविहारादयस्ते

षां

धीहेतुर्बुद्धिरित्यर्थः इच्छादिवारणाय सर्वव्यवहारेति कालादिवारणायाधारत्वपिद्विषये संस्कारेति
संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति अनुभववारणाय संस्कारजन्यमिति तथापि प्रत्यभिज्ञा
यामतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयं क्वचित्तथैव पाठः नचैवं स्मृत्यसंभवः
तस्याः संस्कारजन्यत्वेसति इन्द्रियार्थसन्निकर्षाजन्यार्थकत्वात् तदिति स्मृतित्वावच्छिन्नभिन्नमि
त्यर्थे तेन यत्किंचित्स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेपि न क्षतिः घटादिवारणाय ज्ञानमिति स्मृतिवार
णाय तद्भिन्नमिति तद्वतीति तद्वति तदेव प्रकारो यस्य स तथेत्यर्थः तद्वद्विशेष्यकत्वतत्प्रकारकेति
यावत्स्मृतिवारणायानुभवइति अयथार्थानुभववारणाय तद्वतीति निर्विकल्पकेऽतिव्याप्तिवार
णाय तत्प्रकारकेति तदभाववति तदभावविशेष्यकत्वप्रकारकोनुभवोयथार्थानुभव इत्यर्थः
यथा शुक्ताविदं रजतमिति ज्ञानं स्मृतिवारणायानुभवइति यथार्थानुभवनिरसनाय तदभावव
तीति निर्विकल्पकखण्डनाय तत्प्रकारकेति यथार्थेति यथार्थानुभवः प्रत्यक्षमेवेति चार्वाकाः अ
नुमितिरपीति काणादबौद्धाः उपमितिरपीति नैयायिकैकदेशिनः शाब्दमपीति नैयायिकाः अर्था

अर्थापत्तिरपीति प्रभाकराः अनुपलब्धिरपीति भाट्टवेदान्तिनौ संभवैतिह्यकावपीति पौराणिकाः चै
ष्टिकोपीति तान्त्रिकाः एतेषां मते अस्वरसं संभाव्य तस्य चातुर्विध्यं स्वयं दर्शितं तदिति यथार्थानुभवा
त्मकप्रमायाः कारणमित्यर्थः असाधारणेति कालादिवारणायासाधारणेति व्यापारेति व्याप्तिवारण
य व्यापारवदित्यपि देयं व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः ईश्वरेच्छादिवारण
य तज्जन्यत्वे सतीति कुलालजन्यत्वे सति कुलालजन्यघटजनकत्वं कुलालपुत्रस्याप्यस्ति तत्रातिव्या
प्तिवारणाय प्रथमं सत्यंतं दण्डरूपादिवारणाय तज्जन्यजनक इति अनन्यथेति कार्यान्नियतत्वस्य
भावतो पूर्ववृत्ति पूर्ववृत्तिर्यस्य तत् तथेत्यर्थः अनियतरासभादिवारणाय नियतेति कार्यवारणा
य पूर्वेति दण्डत्वादिवारणायानन्यथासिद्धविशेषणं तस्य आवश्यकत्वेन तत एव रासभादिवारणसंभवे
नियतपदमनर्थकं एवं चानन्यथासिद्धपूर्ववृत्ति कारणमिति फलितं अनन्यथासिद्धत्वमन्यथासिद्धि
शून्यत्वं अन्यथासिद्धिश्चावश्यकक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतत्वं यथावश्य
कक्लृप्तनियतपूर्ववर्तिभिर्दण्डादिभिरेव घटरूपकार्यसंभवे तत्सहभूतत्वं दण्डत्वादेः तदन्यथासिद्धं

प्रागिति कालादिवारणाय प्रागिति असंभववारणाय प्रतियोगीति यदिति यस्मिन्समवायसंबंधेन वर्त्त-
मानं तदिति भावः चक्रादिवारणाय समवेतमिति कार्येणेति कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेत-
त्वे सत्यात्मविशेषगुणभिन्नत्वे सति यत्कारणं च तदसमवायिकारणं तन्तुसंयोगादावव्याप्तिवारणाय
कार्येणेति तन्तुरूपादावव्याप्तिवारणाय कारणेनेति आत्मविशेषगुणेति व्याप्तिवारणाय आत्मविशेष-
गुणभिन्नत्वे सतीति विशेषवारणाय कारणेति तदुभयभिन्नकारणं निमित्तकारणमिति समवाय्य-
समवायिकारणवारणाय तदुभयभिन्नमिति विशेषादावतिव्याप्तिवारणाय कारणेति तदेतदिति
२९ यस्मात्कारणात् कार्यत्वघटकं कारणमुपदर्शितं तस्मादेतत्त्रिविधसाधकमध्ये यत्साधकतमं तदेव क-
रणमिति भावः इति करणप्रपंचः तत्रेति प्रमाणचतुष्टयमध्ये दंडादिवारणाय ज्ञानेति अनु-
मानादिवारणाय प्रत्यक्षेति इंद्रियार्थेति इंद्रियं चक्षुरादिकमर्थो घटादिस्तयोः सन्निकर्षः संयो-
गादिस्तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः सन्निकर्षध्वंसवारणाय ज्ञानमिति अनुमित्यादिवारणायेंद्रि-
यार्थसन्निकर्षेति नन्वसोपनेत्रचक्षुषा कथं पदार्थग्रहणं चक्षुष उपनेत्रव्यवहितत्वेन पदार्थेन

सहसन्निकर्षाभावात् कथं वा स्वच्छजाह्नवीसलिलान्तर्गतमत्स्यादेश्चाक्षुषप्रत्यक्षमिति चेन्न स्वच्छद्रव्य
स्य तेजोनिरोधकत्वाभावेन तदन्तःप्रवेशसंभवात् न चेश्वरप्रत्यक्षेऽतिव्याप्तिरिति वाच्यं अत्र जन्यप्रत्य
क्षस्यैव लक्षितत्वात् तच्च निष्प्रकारकेति सविकल्पकेऽतिव्याप्तिवारणाय निष्प्रकारकेति प्रकारवारणाय
ज्ञानमिति सप्रकारकेति घटादिवारणाय ज्ञानमिति निर्विकल्पकवारणाय सप्रकारकेति
तच्च प्रत्यक्षं षड्विधं घ्राणजरासनचाक्षुषश्रौत्रत्वाचमानसभेदात् ननु प्रत्यक्षकारणीभूतेन्द्रि
यनिष्ठप्रत्यक्षसमानाधिकरणघटकसन्निकर्षः क इत्यपेक्षायां तं विभज्य दर्शयति प्रत्यक्षेति लौ
किकप्रत्यक्षेत्यर्थः संयोगमुदाहरति चक्षुषेति तथाच द्रव्यचाक्षुषत्वाचमानसेषु संयोग एव
सन्निकर्ष इति भावः घटरूपेति चक्षुषा जननमित्यनुषज्यते तथाच द्रव्यसमवेतचाक्षुषत्वाच
मानसरासनघ्राणजेषु संयुक्तसमवाय एव सन्निकर्ष इत्यर्थः रूपत्वेति रूपत्वात्मकयत्सामान्यं
तत्प्रत्यक्ष इत्यर्थः अत्रापि चक्षुषा जननमित्यनुषज्यते तथाच द्रव्यसमवेतसमवेतचाक्षुष
रासनघ्राणजस्पार्शनमानसेषु संयुक्तसमवेतसमवाय एव सन्निकर्ष इति भावः अथ द्रव्यजन्यम

त॰ प्र॰
७

ज्ञानस्य विषयजन्यत्वनियमात् परामर्शविषयकं यत् प्रत्यक्षात्मकं ज्ञानमग्निव्याप्यधूमवन्तं पर्वतमहं जानामीति तद् परामर्शज
न्यमिति अतस्तद्वारणाय हेतुविषयकमित्यपि बोध्यं तथाच ज्ञानविषयत्वात् ज्ञानविषयविषयकं न भवतीति
नियमात् परामर्शविषयो धूमस्तस्य हेतुत्वात् परामर्श [illegible]

वेदयिष्यते कुठारादावतिव्याप्तिवारणाय मितीति प्रत्यक्षादावतिव्याप्तिवारणाय ज्ञानेति ननु अनुमितेरेव दु
र्निरूपत्वात् घटितानुमानमपि दुर्निरूपमित्यत आह परामर्शेति प्रत्यक्षादिवारणाय परामर्शजन्येति परा
मर्शध्वंसवारणाय ज्ञानमिति परामर्शप्रत्यक्षवारणाय हेतुविषयकमित्यपि बोध्यं व्याप्तिविशिष्टेति विष
यितासंबंधेन व्याप्तिविशिष्टं पक्षधर्मताज्ञानं परामर्श इत्यर्थः घटादिज्ञानवारणाय पक्षधर्मतेति धूमवान् पर्व
त इत्यादिज्ञानवारणाय व्याप्तिविशिष्टेति तदिति परामर्शजन्यमित्यर्थः यत्र यत्र धूम इति यत्र यत्र धूमस्त
त्र तत्राग्निरिति व्याप्तेरभिनयः साहचर्यनियम इति लक्षणं सहचरतीति सहचरस्तस्य भावः साहचर्यं
सामानाधिकरण्यमिति यावत् तस्य नियमो व्याप्तिरित्यर्थः स चाव्यभिचरितत्वं तच्चाव्यभिचाराभावः व्यभि
चारश्च साध्याभाववद्वृत्तित्वं तथाच साध्याभाववदवृत्तित्वं व्याप्तिरिति पर्यवसन्नं वह्निमान् धूमादित्यादौ
साध्यो वह्निस्तदभाववान् जलह्रदस्तद्वृत्तित्वं मीनादावदवृत्तित्वं प्रकृते हेतुभूते धूमे इति कृत्वा लक्षणस
मन्वयः धूमवान् वह्नेरित्यादौ साध्यो धूमस्तदभाववदयोगोलकं तद्वृत्तित्वमेव वह्न्यादाविति नातिव्या
प्तिः ननु ज्ञातेयं व्याप्तिः पक्षधर्मताज्ञानमित्यत्र का नाम पक्षधर्मता इत्यपेक्षायां प्रतितत्स्वरूपं निरू

[illegible] कस्मैचित्तत्र
व्याप्तिः २

एम

ननु विशेषणाभावस्तत्राभावस्य विशेषणतायां च नाशाच विशेष्यतानिरूपिता सा भावात्मकविशेषणस्य विशेष्यत्वं कुत इत्याशंक्याह इंद्रियसंबद्ध विशेषणत्वमिति तथाच विशेषणतासन्निकर्षेण इंद्रियसंबद्धस्य तत्वेनाभावस्य विशेष्यं एवमेवेंद्रियसंबद्धस्येव विशेषणत्वेनाभावविशेष्यभावे =५

वेत प्रत्यक्षेपि संयुक्तसमवेतसमवाय एव सन्निकर्षोऽस्त्विति चेन्नैतत्सारं आत्मादेरन घटादिप्रसंगात् समवायसन्निकर्षमुदाहरति श्रोत्रेणेति शब्दस्याकाशात्मकत्वाच्छब्दो गुणत्वादित्यनुमानात् श्रोत्राकाश इति ज्ञानमीयत इति शेषः. ननु श्रोत्रशब्दयोः कथं समवाय इत्यपेक्षायां प्रतिसमुपाद्य दर्शयति कर्णेति श्रोत्रसमवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति चेदुच्यते श्रोत्रमनःसंयोगो वैशिष्ट्यज्ञाने विशेषणेति विशेषणभावो विशेष्यभाव इति बोध्यम् इंद्रियसंबद्धविशेषणत्वमिंद्रियसंबद्धविशेष्यत्वमिति यावत् विशेषणाभावसन्निकर्षमुपपादयति घटाभाववदिति इह भूतले घटो नास्तीत्यादौ विशेष्यतासन्निकर्षोऽवसेयः सत्संप्रयोगस्य विशेषणत्वात् प्रत्यक्षप्रमामुपसंहरति एवमिति उपदर्शितक्रमेणेत्यर्थः ननु सिद्धं प्रत्यक्षज्ञानकरणमिंद्रियार्थसन्निकर्षः किं तस्मादिति चेन्नेत्याह तत्करणमिति प्रत्यक्षप्रमाणं निगमयति तस्मादिति प्रत्यक्षप्रमाकरणत्वादित्यर्थः सिद्धमिति न्यायसिद्धांते सिद्धमित्यर्थः इति तर्कसंग्रहप्रकाशे प्रत्यक्षपरिच्छेदः ॥ प्रत्यक्षानुमानयोः कार्यकारणभावसंगतिमभिप्रेत्य प्रत्यक्षानंतरमनुमानं निरूपयति अनुमितीति अनुमितेः करणमनुमानमित्यर्थः तच्च लिंगपरामर्श एवेति नि

यति व्याप्यस्येति व्याप्यो नाम व्याप्त्याश्रयः सच धूमादिरेव तस्य पर्वतादिनिष्ठत्वं तद्वृत्तित्वं पक्षधर्मता इत्यर्थः अथ
कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासुमानं प्रति लाघवादनुमानाभावभागमुखेनै
व तद्बोधयितुरनुमानं विभजते अनुमानमिति द्वैविध्यं दर्शयति स्वार्थं परार्थं चेति स्वस्यार्थः प्रयोजनं यस्मा
त् स्वार्थमिति समासः स्वप्रयोजनं च स्वस्यानुमेयप्रतिपत्तिः एवं परार्थमित्यस्याप्यर्थः अयमिति व्याप्तिव
तेन लीनमर्थं गमयतीति लिंगं तच्च धूमादि तस्य परामर्शो ज्ञानविशेष इत्यर्थः तस्मादिति लिंगपरामर्शादि
त्यर्थः स्वार्थानुमानमुपसंहरति तदेतदिति यस्मादिदं स्वप्रतिपत्तिहेतुस्तस्मादेतत्स्वार्थानुमानमित्य
र्थः क्रमप्राप्तं परार्थानुमानमाह यदिति यत्पंचावयववाक्यं प्रयुज्यते तत्परार्थानुमानमिति संबंधः अ
थावयवत्वं नाम द्रव्यसमवायिकारणत्वं प्रतिज्ञादिषु तदसंभवात्कथमेतेऽवयवाः स्युरिति चेदनुमानवाक्यै
कदेशत्वादवयवा इत्युपचर्यते इति गृहाण नन्वेवमपि पंचावयववाक्यस्यानुमानत्वमेव न विचारसहं
तस्य लिंगपरामर्शत्वाभावादिति चेन्नैवं लिंगपरामर्शप्रयोजकलिंगप्रतिपादकत्वेनानुमानमित्युप
चारमात्रत्वात् तदुदाहरति यथेति तथाचायमिति अयं च पर्वतस्तथा वह्निव्याप्यधूमवानित्यर्थः

तस्मात्तथेति वह्निव्याप्यधूमवत्वात् वह्निमानित्यर्थः अनेनेति अनेन पंचावयववाक्येनेत्यर्थः ननु पंचाव
यववाक्यमित्यत्र केते पंचावयवाः अत आह प्रतिज्ञेति प्रतिज्ञाद्यन्यतमत्वमवयवत्वं साध्यविशि
ष्टपक्षबोधकवचनं प्रतिज्ञा पंचम्यंतं तृतीयांतं वा लिंगवचनं हेतुः व्याप्तिप्रतिपादकदृष्टांतवचनमुदा
हरणं उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः पक्षे साध्यस्याबाधितत्वप्र
तिपादकवचनं निगमनं इदमेव लक्षणं तद्धिनिधाय प्रतिज्ञादीन् विशिष्य दर्शयति पर्वतो वह्निमानि
त्यादि लिंगेति ज्ञायमानं लिंगमनुमितिकरणमिति नव्योक्तं युक्तं इयं यज्ञशाला वह्निमती अतीत
धूमादित्यादौ लिंगाभावेऽप्यनुमितिदर्शनादित्यभिप्रायवान् लिंगपरामर्शं करणमित्याचष्टे लिं
गपरामर्श इति अनुमानमुपसंहरति तस्मादिति अनुमितिकरणत्वादित्यर्थः अयमेव तृतीयज्ञा
नमित्युच्यते तथाहि महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमं पक्षे धूम
ज्ञानं तद्द्वितीयं अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयं इदमेव लिंगपरामर्श इत्युच्यते अनुमा
नमिति व्यापारवत्कारणं करणमिति मते व्याप्तिज्ञानमेवानुमानं लिंगपरामर्शो व्यापार इत्यवधे

यं फलायोगव्यवच्छिन्नं कारणं करणमिति मतेन तु लिङ्गपरामर्श एवानुमानमिति भावः अन्वयव्यतिरेकिणो लक्षणमा
ह अन्वयेनेति तृतीयायाः प्रयोज्यत्वमर्थः साध्यसाधनयोः साहचर्यमन्वयः तदभावयोः साहचर्यं व्यतिरेकः तथा
चान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः केवलव्यतिरेके अतिव्याप्तिवारणायान्वये
नेति केवलान्वयिनि व्यभिचारवारणाय व्यतिरेकेणेति तथा चान्वयव्याप्तिरूपधर्मितैव व्यतिरेकव्याप्तिश्च सा
ध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः तदुक्तं व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते तयोरभावयो
स्तस्माद्विपरीतः प्रतीयते १ अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते [illegible] व्याप्यो व्यापकः साधना
त्ययः इति २ केवलान्वयिनो लक्षणमाह अन्वयेति अन्वयेनैव व्याप्तिर्यस्मिन् स तथा प्रमेयत्वाभिधेयत्व
योर्व्यतिरेकव्याप्तिं निराकरोति अत्रेति अभिधेयत्वसाधकानुमाने इत्यर्थः ननु कुतस्तन्निषेधोऽतस्तत्र हेतु
माह सर्वस्येति पदार्थमात्रस्येत्यर्थः तथा च सकलपदार्थाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यन्ताभावा यो
प्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्धेरिति व्यतिरेकव्याप्तिर्न संभवत्येवेति भावः केवल
व्यतिरेकिणो लक्षणमाह व्यतिरेकेति व्यतिरेकेणैव व्याप्तिर्यस्मिन् स तथा अन्वयव्यतिरेकिणि अव्या

सिवारणायमात्रेति नचेवंतथेति इयंचपृथिवीनतथानगंधाभाववतीत्यर्थः तस्मात्तथेति गंधाभाववत्त्वंभावदि
तरभेदाभाववतीत्यर्थः ननुत्रकिमितितान्वयव्याप्तिरित्याशंकापरिहरति अत्रेति धारभेदसाधकानुमानइत्यर्थः
इदमुपलक्षणांजीवच्छरीरंसात्मकंप्राणादिमत्वात् यन्नैवं तन्नैवं यथाघटः प्रत्यक्षादिकंप्रमाणमितिव्यव
हर्त्तव्यं प्रमाणाकरणत्वात् यन्नैवं तन्नैवं यथाप्रत्यक्षाभासः विवादास्पदमाकाशमितिव्यवहर्त्तव्यंशब्दव
त्वादित्यादिकमपिकेवलव्यतिरेकीतिद्रष्टव्यं पृथिवीमात्रस्यपक्षत्वादितत्र किंनामपक्षतेत्यपेक्षायांतांनिर्वे
क्ति संदिग्धेति सपक्षवारणायसंदिग्धेति निश्चितेति पक्षेऽतिव्याप्तिवारणायनिश्चितेति निश्चितसाध्याभा
वेति सपक्षेऽतिव्याप्तिवारणायसाध्याभावेति हेतूनिरूप्यप्रसंगाद्धेत्वाभासानाह सव्यभिचारेति अत्रेदंबो
ध्यं अन्वयव्यतिरेकितुपंचरूपोपपन्नंतानिकानिरूपाणीतिचेदुच्यते पक्षधर्मत्वंसपक्षसत्त्वंविपक्षाद्व्यावृत्तिः अबा
धितविषयत्वं असत्प्रतिपक्षत्वंचेति अबाधितःसाध्यरूपोविषयो यस्यतत्तथोक्तं तस्यभावस्तत्त्वं एवंसाध्याभा
वसाधकं हेत्वंतरंयस्यसःसत्प्रतिपक्षइत्युच्यते सनास्तियस्यसोऽसत्प्रतिपक्षस्तस्यभावस्तत्वमितिबोध्यं केवला
न्वयितुचतूरूपोपपन्नमेवस्वसाध्यंसाधयितुंक्षमते तस्यविपक्षविपर्ययेणतद्व्यावृत्तिः विपर्ययात् केव

हेत्वाभासत्वंच हेत्वाभासलक्षणाक्रान्तत्वं:=२

लव्यतिरेक्यपि तथा तस्य सपक्षविपर्ययेणान्वयविपर्ययादिति उपदर्शितदूषणानामन्यतमदूषणोपपन्नत्वाद्धेतु
वदाभासन्ते इति हेत्वाभासाः तत्त्वं चानुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं बाधस्थले वह्निरनुष्ण
इत्यनुमितिप्रतिबंधकं यज्ज्ञानमुष्णत्ववद्ह्रदावनुष्णत्वसाधकं द्रव्यत्वमित्याकारकं तद्विषयत्वस्य विषयतासंबंधे
न द्रव्यत्वरूपहेत्वाभासत्वाल्लक्षणसमन्वयः सद्धेतुवारणाय यथार्थेति घटादिवारणाय अनुमितिकरणप्र
तिबंधकेऽतिव्यभिचारवारिणि अव्याप्तिवारणाय तत्करणान्यतरेति साधारणादिहेतुमध्य इत्यर्थः अथवि
रुद्धेऽतिप्रसक्तिरिति मा स्म दूष्यः सपक्षवृत्तित्वस्यापि निवेशात् अथैवमपि सत्प्रतिपक्षासिद्धौ [illegible] नानीति
माव्याप्ते पक्षवृत्तित्वस्यापि तथात्वात् सर्वैव सपक्षविपक्षाभ्यां व्यावृत्तेनासिद्धिव्यावृत्तः केवलव्यतिरे
कवारणाय तद्भिन्नत्वमपि देयं अन्वयेति केवलान्वयिन्यतिव्याप्तिवारणाय अन्वयेति केवलव्यतिरेकिवार
णाय व्यतिरेकेति अत्रेति उपदर्शितानुमान इत्यर्थः विरुद्धं लक्षयति साध्येति सद्धेतुवारणाय साध्या
भावव्याप्त इति सत्प्रतिपक्षवारणाय सत्प्रतिपक्षाभिन्न इत्यपि बोध्यं कृतेति कार्यत्वादित्यर्थः कृतकत्व
मिति अनित्यत्वेन व्याप्तमिति यद्यपि कृतकत्वं तत्र नित्यत्वमिति व्याप्तिर्भवत्येव तथेति भावः सत्प्रतिपक्षं

अरविंदत्वे गगनीयत्वपक्षतावच्छेदकाभाववत्वे अरविंदत्वपदे गगनीयत्वविरहात् ननुकथ ७४

लक्षयति साध्येति यस्यहेतोः साध्याभावसाधकं साध्याभावस्यानुमापकंहेत्वंतरं प्रतिपक्षहेतुर्विद्यतेयस्य सहेतुः स
त्प्रतिपक्षइत्यर्थः अयमेवप्रकरणसमइत्युच्यते विरुद्धवारणायहेत्वंतरंयस्येति वन्ह्यादिसाध्यवारणायसाध्या
भावेति असिद्धंविभजते असिद्धइति आश्रयासिद्धाद्यंतमत्वमसिद्धत्वं आश्रयासिद्धत्वंचपक्षतावच्छेदका
भाववत्वंभवतिहि अरविंदत्वेगगनीयत्वविरहात् तस्माह यत्रेति उपदर्शितानुमानइत्यर्थः पक्षेति
सद्धेत्वभावेतिव्याप्तिवारणायपक्षइति घटादिप्रभाववारणायहेत्विति सोयंस्वरूपासिद्धः शुद्धासिद्धभा
गासिद्धविशेषणासिद्धविशेष्यासिद्धभेदेनबहुविधः तत्राद्यस्तूपदर्शितएव द्वितीयोयथा उद्भूत
रूपचाक्षुषंगुणः रूपत्वादित्यत्र रूपवत्वहेतोः पक्षैकदेशाव्रृत्तित्वेनभागस्वरूपासिद्धत्वं तृतीयो
यथा वायुःप्रत्यक्षरूपवत्वेसति स्पर्शवत्वादित्यत्र रूपवत्वविशेषणस्यवायावव्रृत्तेस्तद्विशिष्टस्पर्शवत्वे
पितथात्वेनतस्यस्वरूपासिद्धत्वंनिर्वेहति विशेषणाभावेविशिष्टस्याप्यभावात् तुरीयोयथा अत्रैव
विशेषणविशेष्यवैपरीत्येनहेतुः तस्यस्वरूपासिद्धत्वंतुविशेष्याभावप्रयुक्तविशिष्टाभावादितिवाच्यं
व्याप्यत्वासिद्धंनिरूपयति सोपाधिकइति ननुकोयमुपाधिरतस्माह साध्येति साधनाव्यापकउपाधि

रूपवत्वेसतिस्पर्शवत्वादित्यस्यहेतोः ॥

द्विपुक्ते शब्दो नित्यः कृतकत्वादित्यत्र सामान्यवत्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वमुपाधिः स्यात् तद्रूपे
साध्यव्यापकत्व इत्युक्ते, तावदुक्ते सामान्यवत्वादिना अनित्यत्वसाधने कृतकत्वमुपाधिः स्यात् तद्रूपे साधना
व्यापकत्व इत्युक्ते उपाधिभेदमादाय असंभववारणाय अव्यापकत्वपर्यवसितपदमाधेयं साधनभेदमादा
य साधनस्योपाधित्ववारणाय व्यापकशरीरेऽव्यापकत्वपदमावश्यकं देयं सोयमुपाधिस्त्रिविधः केवलसाध्य
व्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति तत्राद्य उपदर्शितः
एवं क्रत्वन्तर्वर्तिनी हिंसा अधर्मजनिका हिंसात्वात् क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः तस्य च
अधर्मजनकत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता यत्र हिंसात्वं तत्र निषिद्धत्वमिति निषिद्धत्वमुपा
धिः साधनाव्यापकः क्रतुहिंसायां निषिद्धत्वस्याभावात् न हिंस्यात् सर्वा भूतानि इति सामान्यवाक्यतः
पशुना यजेत इत्यादि विशेषवाक्यस्य बलीयस्त्वात् अतो हिंसात्वेनाधर्मजनकत्वे प्रयोजकमपि तु नि
षिद्धत्वमेवेत्यादिकमपि द्रष्टव्यं द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरू
पवत्त्वमुपाधिः तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं रूपे व्यभिचारा

तर्क
११

त्र किंतूद्भूतरूपवत्त्वलक्षणोपाधिः पक्षधर्मावच्छिन्नबहिःप्रत्यक्षत्वे यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव आत्मनि व्यभिचारवारणाय बहिः पदं यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्रोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपविरहात् तृतीयो यथा प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वमुपाधिः तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्वं प्रागभावेभावत्वविरहात् किंतु जन्यत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वमेवास्ति यत्र जन्यत्वं तत्र भावत्वमिति साधनाव्यापकत्वं च ध्वंसे भावत्वविरहात् एवं स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वमुपाधिः श्यामत्वस्य नीलघटेपि सत्त्वात् न केवलसाध्यव्यापकत्वं किंतु साधनावच्छिन्नसाध्यव्यापकत्वमेव अष्टमे पुत्रे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यं इति पदकृत्यके अनुमानखण्डः ११

यस्येति सद्धेतुवारणाय प्रमाणान्तरेति घटादिवारणाय साध्येति इतिपदकृत्यके अनुमानखण्ड उपमितिः

उपमितिः करणं :०: अवसरसंगतिमभिप्रेत्यानुमानानन्तरमुपमानं निरूपयति उपमितीति संज्ञासंज्ञीति अनुमितिमपमानमित्यर्थः कुठारादिवारणायमिति प्रत्यक्षादिवारणाय उपेति

प्रतिबंधकीभूतापीत्यादि इतिज्ञाता प्रमनोत्तरकालत्वमा गवयत्वम् =२

११

स्यादिवारणाय संबंधेति संयोगादिज्ञानवारणाय संज्ञासंज्ञीति अयं गवयपदवाच्य इति अभिप्रेत्य गवयो
गवयपदवाच्य इत्यर्थः तेन गवयांतरे शक्तिग्रहाभावप्रसंग इति दूषणमपास्तं तथा च गोसादृश्यविशि
ष्टपिंडज्ञानं करणं अतिदेशवाक्यार्थस्मरणमवांतरव्यापारः उपमितिः फलमिति सारं तच्चोपमानं त्रि
विधं सादृश्यविशिष्टपिंडज्ञानं असाधारणधर्मविशिष्टपिंडज्ञानं वैधर्म्यविशिष्टपिंडज्ञानं च तत्राद्य
मुक्तमेव द्वितीयं यथा खड्गमृगः कीदृगिति पृष्टे नासिकालसदेकशृंगोऽतिक्रांतगजाकृतिश्चेति त
च्छ्रुत्वा कालांतरेण तादृशं पिंडं पश्यन्नतिदेशवाक्यार्थं स्मरति तदनंतरं खड्गः खड्गपदवा
च्य इत्युपमितिरुत्पद्यते अत्र नासिकालसदेकशृंगमेवासाधारणधर्मः तृतीयं यथा उष्ट्रः कीदृगिति पृ
ष्टे अश्वादिवन्न समानपृष्ठो नेह्रस्वग्रीवशरीरश्चेति आप्तेनोक्ते कालांतरेण तत्पिंडदर्शनाद्वैधर्म्यविशि
ष्टपिंडज्ञानं ततोऽतिदेशवाक्यस्मरणं तत उष्ट्रः उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते इत्युपमानखंडः ॥
अवसरसंगतिमभिप्रेत्योपमानानंतरं शाब्दं निरूपयति आप्तेति पूर्वक इति शब्दप्रमाणमित्यर्थः भ्रां
तविप्रलंभकयोर्वाक्यस्य प्रामाण्यवारणाय आप्तेति ननु कोऽयमाप्त इत्यत आह आप्तस्त्विति

यथावक्ता यथाभूतावाधितार्थोपदेष्टा घटादिसमहवारणायपदेति पदमिति निरूपकतासंबंधेन
शक्तिविशिष्टमित्यर्थः असमादिति घटादित्तिपदात्घटरूपोर्थोबोधव्य इतीश्वरेच्छैवशक्तिरित्यर्थः
५८ अर्थसत्यानुकूलपदार्थसंबंधत्वं तल्लक्षणं शक्तिरिवलक्षणापिपदस्यवृत्तिः अथकेयंलक्षणा शु
क्यसंबंधोलक्षणा सात्रिविधा जहत्स्वार्थाजहत्स्वार्थाजहदजहत्स्वार्थाभेदात् यत्तेतेच गंगायांघोषइत्यत्रगंगाप
दशक्यप्रवाहसंबंधस्तीरे लक्षणाबीजंच तात्पर्यानुपपत्तिः अतःप्रवाहेघोषतात्पर्यानुपपत्तेस्ती
रेलक्षणासेत्यर्थः वृत्तिर्णयांतीत्यादौ द्वितीया सोयमित्यादौ तृतीया पदस्येति असंभववार
णायपदांतरव्यतिरेकप्रयुक्तेति पुनरसंभववारणायपदांतरेति आर्थेति आकांक्षादिवारणाय
अर्थेति पदार्थानामिति असहोच्चारितेषुअन्वितमात्रवारणाय अधिकत्वेनेति आकांक्षावारणायप
दानामिति आकांक्षादिशून्यवाक्यस्याप्रमाणत्वंनिषेधयति तथाचेति आकांक्षादिकंशाब्द
हेतुरित्युक्तेचायमर्थः यथेति अनाकांक्षमुदाहरणंदर्शयति नन्वेतावताशाब्दसामग्रीप्रपंचि
ताप्रमाविभाजकवाक्यस्याप्युपदिष्टेन तत्कृतेनप्रदर्शितमित्यतआह वाक्यार्थेति प्र

कर्तृत्वं च प्रत्यक्षत्वमित्यनुभवसिद्धा जातिः शाब्दबोधक्रमो यथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्म
कगमनानुकूलवर्त्तमानकृतिमान् कृतिमानिति शाब्दबोधः द्वितीयायाः कर्मत्वमर्थः धातोर्ग
मनं अनुकूलत्वं च संसर्गमर्यादया भासते लटो वर्त्तमानत्वं आख्यातस्य कृतिः तत्संबंधः संसर्ग
मर्यादया भासते रथो गच्छतीत्यत्र गमनानुकूलव्यापारवान् रथ इति शाब्दबोधः स्नात्वा गच्छ
तीत्यत्र गमनप्रागभावावच्छिन्नकालीनस्नानकर्त्ता गमनानुकूलवर्त्तमानकृतिमानिति शाब्दबो
धः क्त्वाप्रत्ययस्य कर्त्ता पूर्वकालीनत्वं चार्थः एवमन्यत्रापि वाक्यबोधः अयथार्थानुभवं विभज
ते अयथार्थेति संशयं लक्षयति एकस्मिन्निति एकस्मिन्नेव पुरोवर्त्तिनि पदार्थे विरुद्धाधिकरण
येनानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यसंबंधः तदवगाहिज्ञानं संशय इत्यर्थः घट
पटावितिसमूहालंबनज्ञानस्य घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वादति
प्रसक्तिवारणाय एकस्मिन्निति घटः पृथिवीतिज्ञानस्यैकस्मिन्धर्मिणि घटे घटत्वपृथिवीत्वरू
पनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसंगवारणाय विरुद्धेति परत्वविरुद्धघटत्ववान् घट

पुनरसंभववारणायव्यापकारोपेति

इतिज्ञानेऽतिप्रसक्तिवारणायनेनेति मिथ्येति पदार्थज्ञानवारणायमिथ्येति मिथ्यार्थवारणायज्ञानेति तर्कं
लक्षयति व्याप्येति असंभववारणायव्यापारोपेति अत्रवह्न्यभावोव्याप्यः धूमाभावोव्यापकः यद्यपितर्कस्य
विपर्ययात्मकेनपृथग्विभागोऽनुचितः तथापिप्रमाणानुग्राहकत्वात् पृथगुचितइतिबोध्यं स्वप्नम्
पुरीततिवहिर्देशांतर्देशयोःसंयोगौसिद्धानाड्यांवामनसिस्थितेऽदृष्टविशेषेणधातुदोषेणवाजन्यते सच
मानसविपर्ययेंतर्भूतः सुखंनिरूपयति सर्वेषामिति सर्वात्मनामनुकूलवेदनीयमित्यर्थः
अहंसुखीत्यनुभवसिद्धसुखत्वजातिमद्धर्ममात्रासाधारणकारणगुणोवासुखं एवंदुःखवारणायसर्वे
षामिति प्रतिकूलेति दुःखत्वजातिमदधर्ममात्रासाधारणकारणगुणोदुःखं एवंकृत्यंसर्वत्र इच्छां
निरूपयति इच्छेति कामइतिपर्यायः इच्छात्वजातिमतीच्छा साद्विधा फलेच्छा उपायेच्छाच फलंसुखा
दिकं उपायोयागादिः द्वेषंनिरूपयति क्रोधइति द्वेष्मीत्यनुभवसिद्धद्वेषत्वजातिमान् दुःखसाधन
ताज्ञानजन्यगुणोवाद्वेषः प्रयत्नंनिरूपयति कृतिरिति प्रयत्नत्वजातिमान्प्रयत्नः सत्रिविधः प्रवृत्तिनि
वृत्तिजीवनयोनिभेदात् इच्छाजन्योगुणःप्रवृत्तिः द्वेषजन्योगुणोनिवृत्तिः जीवनादृष्टजन्योगुणो

जीवनयोनिः सच प्राणसंचारकारणं धर्ममाह विहितेति यागादिक्रियावारणाय कर्मजन्य इति स च कर्मनाशाज
लस्पर्शकीर्तनभोगतत्त्वज्ञानादिना नश्यत इति अधर्मलक्षणमाह निषिद्धेति वेदेनेत्यर्थः धर्मवारणाय वेदेनि
षिद्धेति निषिद्धक्रियावारणाय कर्मजन्य इति स च भोगप्रायश्चित्तादिना नश्यति एतावेवादृष्टमित्युच्येते वा
सनाजन्यौ च वासना विलक्षणसंस्कारं संस्कारं विभजते संस्कारेति सामान्यगुणात्मविशेषगुणोभयवृत्ति
गुणत्वव्याप्यजातिमान्संस्कारः घटादिवारणाय गुणत्वव्याप्येति संयोगादिवारणाय आत्मविशेषगुणोभ
यवृत्तिरिति ज्ञानादिवारणाय सामान्यगुणेति द्वितीयादिपतनासमवायिकारणं वेगः रूपादिवारणाय द्वि
तीयादिपतनेति कालादिवारणाय समवायीति भावनां लक्षयति अनुभवेति आत्मादिवारणाय प्रथमद
ले अनुभवध्वंसवारणाय द्वितीयदलं स्थितिस्थापकमाह अन्यथेति पृथिवीमात्रसमवेतसमवेतसंस्कार
त्वव्याप्यजातिमत्त्वं स्थितिस्थापकत्वं गंधमादाय गंधे अतिव्याप्तिवारणाय संस्कारव्याप्येति भावनात्वमादाय
भावनावारणाय पृथिवीसमवेतसमवेतेति स्थितिस्थापकरूपान्यतरत्वमादाय रूपवारणाय जातीति इ
तिगुणेति द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गुणः द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषदलं सामा
न्यादावतिव्याप्तिवारणाय विशेष्यदलं चलनेति संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म इ

त्वसुत्वकसंयोगवारणाय सत्यंते घटादिवारणाय विशेष्यदलं अद्वैति अपक्षेपणावारणाय उद्वैति कालादिवार
णायासाधारणेति विवाध्यं अधोदेशेति उत्क्षेपणावारणायाधोदेशेति कालादिवारणायासाधारणेत्यादिदेयं वि
प्रकृष्टेति उत्क्षेपणादिवारणाय विप्रकृष्टेति कालादिवारणायासाधारणमण्यवश्यकं नित्यमिति संयोगादि
वारणाय नित्यमिति कालादिपरिमाणवारणायानेकेति अनेकान्यगतत्वं च समवायेन बोध्यं तेनात्यंताभावे
ऽतिव्याप्तिः नित्यद्रव्यवृत्तयइति घटत्वादिवारणाय नित्यद्रव्यवृत्तयइति आत्मत्वमनस्त्ववारणाय आत्म
त्वमनस्त्वभिन्नत्वमपि बोध्यं नित्यइति आकाशादिवारणाय संबंधइति संयोगवारणाय नित्यइति स्वरू
पसंबंधवारणाय इतद्भिन्नत्वमपि देयं प्रागभावं लक्षयति अनादिरिति घटादिवारणाय प्रथमदलं पर
माणुवारणाय द्वितीयदलं पुनः प्रागभावः कस्मिन्काले भवतीत्यत आह उत्पत्तेरिति कार्यस्योत्पत्तेः प्राक्
स्वप्रतियोगिसमवायिकारणे वर्ततइत्यर्थः ध्वंसं लक्षयति सादिरिति घटादिवारणायानंतइति आ
त्मादिवारणाय सादिरिति उत्पत्तिरिति कार्यस्योत्पत्त्यनंतरं स्वप्रतियोगिसमवायिकारणवृत्तिरित्यर्थः
सच ध्वंसइति शब्दविषयः अत्यंताभावं लक्षयति त्रैकालिकेति त्रैकालिकत्वे सति संसर्गावच्छि
न्नप्रतियोगिताकोऽत्यंताभावः ध्वंसप्रागभाववारणाय त्रैकालिकेति भेदवारणाय संसर्गेत्यादिः

राम
७